## संस्कृतम् (कक्षा 10)

| *अधिगम-प्रतिफलानि* | *उपयुक्तानि संसाधनानि* | *प्रस्ताविता: गतिविधय: (शिक्षकाणामभिभावकानाम् वा साहायेन विधेया:)* |
|---|---|---|
| • विद्यार्थी सरलसंस्कृतभाषया कक्षोपयोगीनि वाक्यानि वक्तुं समर्थ: अस्ति।<br>• विद्यार्थी कक्षात: बहि: दैनन्दिन-जीवनोपयोगीनि वाक्यानि वदति। | एनसीईआरटीद्वारा अथवा राज्यद्वारा निर्मितानि पाठ्यपुस्तकानि, गृहे उपलब्धा: पठनलेखनसामग्र्य: अन्यदृश्यश्रव्यसामग्र्य: यथा इंटर्नेट-वेबसाइट, आकाशवाणी-दूरदर्शनादिषु उपलभ्यन्ते | **सप्ताह: 1**<br>श्रवणसम्भाषणकौशले<br>• शिक्षणक्रमे शिक्षक: सरल-संस्कृत-वाक्यानां प्रयोगं कुर्यात्। छात्राणामवबोधनं परीक्षितुं मध्ये मध्ये प्रश्नान् पृच्छेत्। संस्कृतभाषावबोधनसमये छात्रै: काठिन्यमनुभूयते चेत् मध्ये मध्ये हिन्दीभाषाया: क्षेत्रियभाषाया: अपि प्रयोग: करणीय:।<br>• यदा शिक्षक: विद्यार्थिन: प्रश्नं पृच्छेत् तदा प्रश्नस्य भाषा संस्कृतमेव भवितव्या। छात्रा: अपि संस्कृतभाषयैव उत्तरप्रदानाय प्रोत्साह्या:।<br>• कक्षासु सामान्योपयोगिवाक्यानां पौन:पुन्येन अभ्यासं कुर्यात्, यथा - सुप्रभातम्।<br>शुभमध्याह्नम्।<br>शुभसन्ध्या।<br>शुभरात्रि:।<br>भवान् कथम् अस्ति?<br>अद्य वयं पद्यपाठं पठाम:।<br>भवन्त: सन्नद्धा: खलु?<br>महोदय! किम् अहम् अन्त: आगन्तुं शक्नोमि?<br>• शिक्षिका प्रारम्भे छात्रान् दैनन्दिन-जीवनोपयोगिन: प्रश्नान् पृच्छेत्। यथा – अद्य गृहे पित्रा सह कीदृश: वार्तालाप: कृत:?<br>पित:! मम गणवेशं पुरातनं जातम्। कृपया मह्यं नूतनं गणवेशं दापयतु।<br>• पूर्वकक्षायाम् पठितानाम् पाठानाम् सामान्यम् आलोचनम् स्यात्। छात्रा: कथानाम् स्मरणपूर्वकम् चर्चाम् कुर्यु:। गीतानि अपि स्मरेयु:। |
| • अपठितगद्यांशं पठित्वा तदाधारितप्रश्नानामुत्तरप्रदाने सक्षम: अस्ति।<br>• सरल-संस्कृत-भाषया औपचारिक- | | **सप्ताह: 2**<br>(प्रथमसप्ताहगतिविधिभि: सह)<br>पठनलेखनकौशले<br>1. पाठ्यपुस्तकेतर-साहित्येभ्य: स्तरानुकूलं कथा: निबन्धान् च संगृह्य सप्ताहे पक्षे वा एकवारं पठितुं छात्रान् निर्दिशेत्। तदाधारित-प्रश्नान् पृच्छेत्, चर्चां कुर्यात्। एवं संस्कृतमयवातावरणनिर्माणं कुर्यात्। छात्राणामधिकाधिकी सहभागिता भवेदिति सुनिश्चितं कुर्यात्। |

| | | |
|---|---|---|
| अनौपचारिक-पत्रलेखनार्हः भवति।<br>• अनुच्छेद-लेखनं, संवाद-लेखनं चित्राधारित-वर्णनञ्च करोति। | | यथा -<br>स्वच्छता अस्माकं जीवने अत्यावश्यकी। यदि वयं गृहे आपणे मार्गे विद्यालये कार्यालयादिषु स्थानेषु जीवनव्यवहारे सर्वथा स्वच्छतां पालयामः, वयं स्वस्थाः भवामः। स्वस्थशरीरस्य मनसः च कृते स्वच्छता महत्त्वपूर्णं स्थानं भजते। स्वस्थे च शरीरे स्वस्थं मनः निवसति, स्वस्थे च मनसि वयं सत्कर्मणि प्रवृत्ताः भवामः।<br>प्रश्नाः – क. जीवने का आवश्यकी?<br>ख. वयं कथं स्वस्थाः भवामः?<br>ग. स्वस्थं मनः इत्यनयोः पदयोः किं विशेषणपदम्?<br>घ. अस्य अनुच्छेदस्य कृते समुचितम् शीर्षकं लिखत।<br>2. औपचारिक-अनौपचारिक-पत्राणां प्रारूपं पदाय विषयगत-चर्चां च विधाय छात्रैः पूर्णं पत्रं लेखयेत्, अशुद्धीनां च संशोधनं कृत्वा पुनः बोधयेत्। छात्रैः तेषां पत्राणां कक्षायां प्रस्तुतिं कारयेत्। अनन्तरं तेषां प्रतिपुष्टिं प्रदद्यात्।<br>यथा - अवकाशार्थं प्रधानाचार्यं प्रति पत्रम्, जिलाधिकारिणं प्रति पत्रम् इत्यादीनि (औपचारिकपत्रम्)<br>मित्रस्य कृते पत्रम्। पुत्रस्य पितरं प्रति पत्रम् इत्यादीनि। (अनौपचारिकपत्रम्)<br>3. शिक्षकः कम् अपि विषयम् अवलम्ब्य प्रतिछात्रम् एकैकं वाक्यं रचयितुं कथयेत्। तानि वाक्यानि संकलय्य सार्थकम् अनुच्छेदं सज्जीकुर्यात्। एवं संस्कृतमयवातावरणे कक्षायां संवादवाचनस्य अनुच्छेदलेखनस्य च अभ्यासं कारयेत्। यथा – कोरोना-प्रतीकारः, पर्यावरणं संरक्षणम्, स्वच्छभारतम्, विद्यायाः महत्त्वम् इत्यादयः।<br>• कामपि परिस्थितिं मनसि निधाय कांश्चन प्रश्नान् पृष्ट्वा संवादाय उत्तरप्रदानाय च निर्दिशेत्। छात्राणाम् उत्तराणि च संशोध्य संवादालेखनं कारयेत्। यथा - शिक्षक-छात्रयोः वार्तालापः, मित्र-संवादः इत्यादयः।<br>• संवादशैलीम् अनुकर्तुं दूरदर्शने आकाशवाण्याञ्च संस्कृत-समाचारं श्रोतुं द्रष्टुं च निर्दिशेत्।<br>• कानिचन चित्राणि दर्शयित्वा तद्विषये वक्तुं लेखितुं च छात्रान् आदिशेत्। अशुद्धीनां च संशोधनं कृत्वा पुनः लेखितुं निर्दिशेत् |
| • पाठ्यपुस्तकगतान् गद्यपाठान् अवबुध्य तेषां | | **सप्ताहः 3**<br>(प्रथमसप्ताहद्वयस्य गतिविधिभिः सह गद्यपाठस्य अध्ययनम्)<br>पठनलेखनश्रवणसम्भाषणकौशलानि<br>कथादयः गद्यपाठाः यथासंभवं प्रत्यक्षविधिना पाठनीयाः। |

| | | |
|---|---|---|
| सारांशं वक्तुं लिखितुं च समर्थः अस्ति।<br>• तदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतेन वदति लिखति च। | | शिक्षकेन आदर्शवाचनं, छात्रैः व्यक्तिगतरूपेण समूहे वा अनुवाचनम्, अपरिचितपदानाम् अर्थावबोधनम्, पाठस्य भावावबोधनं च। छात्राणाम् अवबोधं परीक्षितुं मध्ये मध्ये प्रश्नाः अपि प्रष्टव्याः। छात्रैः पाठस्य सारांशः संस्कृतेन स्वभाषया वा प्रस्तोतव्यः। शिक्षकः यथास्थानं संशोधनं कारयेत्।<br>पाठनप्रसंगे केचन एतादृशाः अपि प्रश्नाः प्रष्टुं शक्यन्ते येन छात्राः चिन्तनार्थं अवसरं लभेरन्, विचार्य ते निष्कर्षमवाप्नुयुः, यथा – भवान् अस्यां परिस्थितौ भवेत् चेत् किं कुर्यात्? पाठस्य नायिकया यः निर्णयः गृहीतः किं स एव निर्णयः समीचीनो वा?<br>यथा - पाठस्य नाम – बुद्धिर्वलवती सदा।<br>प्रश्नः – क. बुद्धिमत्याः प्रत्युत्पन्नमतित्वं संस्कृतेन स्वभाषया वा वर्णयत।<br>ख. "बुद्धिर्वलवती सदा" इति अस्य पाठस्य सन्देशं लिखत। |
| • संस्कृतश्लोकान् उचित-बलाघात-पूर्वकं छन्दोनुगुणम् उच्चारयति।<br>• श्लोके प्रयुक्तानां सन्धियुक्तपदानां विच्छेदं करोति।<br>• श्लोकान्वयं कर्तुं समर्थः अस्ति।<br>• तेषां भावार्थं प्रकटयति।<br>• श्लोकाधारितानां प्रश्नानाम् उत्तराणि संस्कृतेन वदति लिखति च। | | **सप्ताहः 4**<br>(पूर्वसप्ताहानाम् गतिविधिभिः सह पद्यपाठस्य अध्ययनम्)<br>पठनलेखनश्रवणसम्भाषणव्याकरणकौशलानि<br>• संस्कृतश्लोकानां गीतानां वा पाठनसमये शिक्षकः सस्वरवाचनं कुर्यात्। अथ्वा ई-सामग्रीणाम् उपयोगम् कुर्यात्। यदा कदा व्यक्तिगतरूपेण समूहे वा अनुवाचनं कारयेत्। छात्राः स्खलनं कुर्वन्ति चेत् प्रेम्णा शनैः शनैः दोषाः अपसारणीयाः।<br>• क्लिष्टानां पदानाम् अर्थं बोधयेत्, सन्धियुक्तपदानां विच्छेदं कुर्यात् कारतेत् च, श्लोकानाम् अन्वयपूर्वकम् अर्थं बोधयेत् च। छात्राणाम् अवबोधं परीक्षितुं मध्ये मध्ये प्रश्नाः अपि प्रष्टव्याः।<br>• संस्कृतसाहित्ये समुपलब्ध-नैतिक-सामाजिक-मूल्यान्याधृत्य स्वकीयान् विचारान् प्रकटयितुं निर्दिशेत्।<br>• छात्रैः पाठस्य सारांशः संस्कृतेन स्वभाषया वा प्रस्तोतव्यः। शिक्षकः यथास्थानं संशोधनं कारयेत्। पाठनप्रसंगे केचन एतादृशाः अपि प्रश्नाः प्रष्टुं शक्यन्ते येन छात्राः चिन्तनार्थं अवसरं लभेरन्।<br>यथा - पाठस्य नाम – सूक्तयः<br>त्वक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥<br>पदच्छेदः – यः + अभि + उदीरयेत्<br>भुङ्क्ते + अपक्वम्<br>अन्वयः – यः धर्मप्रदां वाचं त्यक्त्वा परुषां वाचम् अभ्युदीरयेत् सः विमूढधीः पक्वं फलं परित्यज्य अपक्वं भुङ्क्ते।<br>भावार्थः – मनुष्यः सदा मधुरां वाचं वदेत्।<br>प्रश्नः – क. पुरुषः कीदृशीं वाचं वदेत्? |